श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।

वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४४

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४४

*नामकरणवर्णनम्*

गूढं वसुदेवगिरा
    कर्तुं ते निष्क्रियस्य संस्कारान्।
हृद्गतहोरातत्त्वो
    गर्गमुनिस्त्वद्गृहं विभो गतवान्॥ १ ॥

नन्दोऽथ नन्दितात्मा
    वृन्दिष्टं मानयन्नमुं यमिनाम्।
मन्दस्मितार्द्रमूचे
    त्वत्संस्कारान् विधातुमुत्सुकधीः॥ २ ॥

यदुवंशाचार्यत्वात्
    सुनिभृतमिदमार्य कार्यमिति कथयन्।
गर्गो निर्गतपुलक-
    श्चक्रे तव साग्रजस्य नामानि॥ ३ ॥

कथमस्य नाम कुर्वे
    सहस्रनाम्नो ह्यनन्तनाम्नो वा।
इति नूनं गर्गमुनि-
    श्चक्रे तव नाम नाम रहसि विभो॥ ४ ॥

कृषिधातुणकाराभ्यां
    सत्तानन्दात्मतां किलाभिलपत्।
जगदघकर्षित्वं वा
    कथयदृषिः कृष्णनाम ते व्यतनोत्॥ ५ ॥

www.prapatti.com

अन्यांश्च नामभेदान्
    व्याकुर्वन्नग्रजे च रामादीन्।
अतिमानुषानुभावं
    न्यगदत्त्वामप्रकाशयन् पित्रे॥ ६ ॥

स्निह्यति यस्तव पुत्रे
    मुह्यति स न मायिकैः पुनः शोकैः।
द्रुह्यति यस्स तु नश्ये-
    दित्यवदत् ते महत्त्वमृषिवर्यः॥ ७ ॥

जेष्यति बहुतरदैत्यान्
    नेष्यति निजबन्धुलोकममलपदम्।
श्रोष्यति सुविमलकीर्ती-
    रस्येति भवद्विभूतिमृषिरूचे॥ ८ ॥

अमुनैव सर्वदुर्गं
    तरितास्थ कृतास्थमत्र तिष्ठध्वम्।
हरिरेवेत्यनभिलप-
    न्नित्यादि त्वामवर्णयत् स मुनिः॥ ९ ॥

गर्गेऽथ निर्गतेऽस्मिन्
    नन्दितनन्दादिनन्द्यमानस्त्वम्।
मद्गदमुद्गतकरुणो
    निर्गमय श्रीमरुत्पुराधीश॥ १० ॥

**********